# Shri Subrahmanyabhujangaprayatastutih

# શ્રીસુબ્રહ્મણ્યભુજઙ્ગપ્રયાતસ્તુતિઃ

## Document Information

Text title : subrahmaNyabhujangaprayAtastutiH

File name : subrahmaNyabhujangaprayAtastutiH.itx

Category : subrahmanya, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, bhujanga

Location : doc_subrahmanya

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્યભુજઙ્ગપ્રયાતસ્તુતિઃ

શ્રીકાર્તિકેયક્ષેત્રે - (તિરુચ્ચેન્દૂરપરનામકે)

મહેશાનનાબ્જાર્કમર્ઘેન્દુફાલં મહાવિઘ્નવારાશિકુમ્ભપ્રભૂતમ્ ।
મહેન્દ્રાદિસેવ્યં પ્રણમ્રાન્તરઙ્ગં મહાપાપદાહં મહેભાસ્યમીડે ॥ ૧॥

અપસ્મારમુખ્યાન્ક્ષણાદ્રોગવર્યાન્ હરન્તં નતાનાં નિજાઙ્ઘ્રિપ્રણામાત્ ।
ભજે સૂનુમાદ્યસ્ય વૈદ્યસ્ય શમ્ભોરબોધામયસ્ય પ્રશાન્ત્યર્થમારાત્ ॥ ૨॥

અવજ્ઞાય ખેલાં ચરન્તં કુમારં મહેશં પ્રણન્તું વિધિઃ સમ્ભ્રમેણ ।
ગતોઽન્તઃ પુનર્નિષ્ક્રમન્યેન કારાગૃહં પ્રાપિતસ્તં ભજે તારકારિમ્ ॥ ૩॥

કથં ચન્દ્રતુલ્યં મુખં તે વદામઃ કલઙ્કેન હીનં તથા કૃષ્ણપક્ષે ।
ક્ષયેનાપિ નમ્રાન્તરધ્વાન્તભેદાત્તતસ્તદ્વિશિષ્ટં ગુહેશાનસૂનો ॥ ૪॥

કદાહં નિરીહો હૃદમ્ભોજમધ્યે પયોજાભયે કુક્કુટં શક્તિવર્યમ્ ।
કરૈઃ સન્દધાનં સદા વીક્ષમાણો મુદં પારશૂન્યાં ભજે કાર્તિકેય ॥ ૫॥

વિવેકં વિરક્તિં શમાદેશ્ચ ષટ્કં મુમુક્ષાં ચ સમ્પ્રાપ્ય કૃત્વા વિચારમ્ ।
દૃઢં બોધમાપ્સ્યે કદા વેદશીર્ષૈઃ કૃપાં કુર્વનાથે મયીશાનસૂનો ॥ ૬॥

જનન્યાઃ પ્રસૂતેઃ સ્થલં વાસભૂમિઃ પિતુશ્ચેતિ શૈલં ન જહ્યાં કદાપિ ।
ઇતીવાનતાલેઃ પ્રબોધાય શૈલે વસન્તં સદા પાર્વતીપુત્રમીડે ॥ ૭॥

જનાનાં શયાનં સદા હૃદ્બિલે તં ભુજઙ્ગં મનઃસંજ્ઞમારાન્નિહન્તુમ્ ।
મયૂરં ભુજગસ્ય ભોક્તારમાસ્તે સમારુહ્ય નિત્યં ભવાગ્છમ્ભુસૂનો ॥ ૮॥

નતાનામભીષ્ટાનિ દાતું વિચિત્રાણ્યલં શક્તિરસ્તીતિ સમ્બોધનાય ।
અજસ્રં વહન્તં કરે શક્તિમીડે પરાશક્તિપુત્રં કૃપાવારિરાશિમ્ ॥ ૯॥

નિવાર્યાશુ રોગાન્સમસ્તાન્ત્યભક્તાન્ કૃપાપાઙ્ગલેશૈઃ સદા પાલયન્તમ્ ।
સદારં સવાહં સભૃત્યં સશિષ્યં સદા ભાવયે ષણ્મુખં હૃત્સરોજે ॥ ૧૦॥

પુરા તારકં સિંહવક્ત્રં ચ શૂરં જઘાનાજિમધ્યે સુરાણાં કૃતે યઃ ।

મહેશાત્મજં હ્યૌરસં ભક્તવશ્યં પુલિન્દાત્મજાસ્વાન્તચોરં ભજેઽહમ્ ॥ ૧૧॥

મહેશસ્ય પઞ્ચાનનસ્યામ્બિકાયા મુખાનાં પ્રમોદં નિજાસ્યૈ ક્ષણાદ્યઃ ।
પ્રદાતું ષડાસ્યો બભૂવૈકદા તં ગુહં ગન્ધશૈલાધિવાસં ભજેઽહમ્ ॥ ૧૨॥

મુખેનાબ્જમિન્દું સ્મિતેન મ્રદિમ્ના કરસ્ય પ્રવાલં ગતેનેભરાજમ્ ।
હસન્તં હરિન્નાથસંસેવિતાઙ્ઘ્રિં સદા માનસે કુર્મહે કાર્તિકેયમ્ ॥ ૧૩॥

યમાહુર્જનાઃ પ્રાકૃતા દેહમાત્રં હૃષીકાણિ કેચિજ્જગુશ્ચિત્તમન્યે ।
તમાત્માનમાનન્દસચ્ચિત્સ્વરૂપં સદા ભાવયે પાર્વતીપ્રેમપાત્રમ્ ॥ ૧૪॥

યમિચ્છન્તિ વેત્તું મખૈર્વેદપાઠૈસ્તથા દાનતશ્ચોપવાસૈશ્ચ વિપ્રાઃ ।
તમત્યન્તગૂઢં મયૂરાધિરૂઢં ભજે નીલકણ્ઠસ્ય પુત્રં પવિત્રમ્ ॥ ૧૫॥

વિબોધાખ્યમુદ્રાયુતસ્યાત્મયોનેર્વિયોગો ન મે જાતુ ભૂયાદિતીવ ।
સમુદ્રસ્ય તીરે નિવાસં સદા યઃ કરોત્યાદરાત્તં ગુહં સંશ્રયેઽહમ્ ॥ ૧૬॥

સુરારિષ્વજસ્રં શરાણાં પ્રમોક્ષં વિધાતું શરાણાં વને યો બભૂવ ।
સુરારાત્યમિત્રં પુરારાતિપુત્રં સુરેન્દ્રાત્મજાપ્રાણકાન્તં ભજે તમ્ ॥ ૧૭॥

વિધાતું સ્તુતિં તે વિધીન્દ્રેશમુખ્યા ન શક્તાઃ કિમત્રાસ્તિ સામર્થ્યમસ્ય ।
તથાપ્યાદરાચ્ચિત્તચાઞ્ચલ્યતો વા કૃતં મત્પ્રયત્નં સહસ્વેશસૂનો ॥ ૧૮॥

ભુજઙ્ગાખ્યવૃત્તેન ક્લૃપ્તાં સ્તુતિં યે પઠન્ત્યાદરાચ્છ્રદ્ધયા શુદ્ધચિત્તાઃ ।
સુપુત્રાયુરારોગ્યવિદ્યાવતસ્તાન્ કુરુષ્વેશસૂનો મયા પ્રાર્થિતસ્ત્વમ્ ॥ ૧૯॥

ઇતિ શ‍ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતા શ્રીસુબ્રહ્મણ્યભુજઙ્ગપ્રયાતસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by PSA Easwaran

*Shri Subrahmanyabhujangaprayatastutih*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*